ष्ठ वर्जयेत्"। "निमन्त्रयेत पूर्वेद्युर्ब्राह्मणानात्मवान् शुचिः। तैश्चापि संयतैर्भाव्यम् मनोवाक्कायकर्मभिः" याज्ञ० "पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते। निमन्त्रयेत त्र्यवरान् सम्यक् विप्रान् यथोदितान्" मनुः। "पूर्वेद्युर्निवेदनम् वेदनं परेद्युर्द्वितीयं, तृतीयमामन्त्रणम्" आपस्तम्बः "निवेदनं श्वोमया श्राद्धं कर्त्तव्यं तत्र भवन्तो निमन्त्रणीया इत्येवंरूपं निवेदनम्। द्वितयं वेदनं त्वामहं निमन्त्रये इत्यनेन निमन्त्रणम्। त्वयि श्राद्धमहं करिष्ये" इति तृतीयमनुज्ञाग्रहणरूपम्" श्रा०त० रघु०

**निमय** पु० नि+मि—अच्। परिवर्त्तने द्रव्यान्तरदानेन द्रव्यान्तरग्रहणरूपे विनिमये तत्र अविक्रेयद्रव्याणां विनिमयेनैव ग्रहणं कर्त्तव्यं यथा भा०शा० ७८अ० "रसारसैर्निमातव्या नत्वेव लवणं रसैः। कृतान्नञ्चाकृतान्नेन तिलाधान्येन तत्समाः"। अविक्रेयाणि अपण्यशब्दे २२४पृ० दर्शितानि।

**निमान** न०निमीयतेऽनेन नि+मा—ल्युट्। मूल्ये "संख्यायागुणस्य निमाने मयट्" पा० "निमानं मूल्यम्" सि०कौ०।

**निमि** पु०अत्रिवंश्ये १दत्तात्रेयपुत्रे "स्वायम्भुवोऽत्रिः कौरव्य! परमर्षिः प्रतापवान्। तस्य वंशे महाराज! दत्तात्रेय इति स्मृतः। दत्तात्रेयस्य पुत्रोऽभून्निमिर्नाम तपोधनः" भा०अनु० ९१अ०। २कौरववंश्ये भाविनृपभेदे "दण्डपाणिर्निमिस्तस्य क्षेमको भविता ततः। क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ" भाग० ९।२२।९। द्वापरयुगीये असुरांशनृपभेदे "अजप्रपातने चैव निमिर्हंसश्च दानवौ" हरिवं० १९१अ०। ४इक्ष्वाकुवंश्ये नृपभेदे "आसीद्राजा निमिर्नाम इक्ष्वाकूणां महात्मनाम्। पुत्रो द्वादशमो वीर्य्ये धर्मे च परिनिष्ठितः" रामा०उ०५५ स० तस्य वसिष्ठशापेन विदेहप्राप्तिकथा "यस्मात्त्वमन्यं कृतवान् मामवज्ञाय पार्थिव!। चेतनेन विनाभूतो देहस्ते पार्थिवैष्यति"। तत्प्रार्गान्ते तस्य सर्वभूतानां नेत्रेषु निमेषरूपतया स्थितिकथा "सुप्रीतास्तु सुराः सर्वे निमेश्चेतस्तदाऽब्रुवन्। वरं वरय राजर्षे! क्व ते चेतो निरूप्यताम्। एवमुक्तः सुरैः सर्वैर्निमेश्चेतस्तदाऽब्रवीत्। नेत्रेषु सर्वभूतानां वसेयं सुरसत्तमाः!। वाढमित्येव विबुधा निमेश्चेतस्तदाऽब्रुवन्। नेत्रेषु सर्वभूतानां वायुभूतश्चरिष्यसि। त्वत्कृते निमिषिष्यन्ति चक्षूंषि पृथिवीपते!। वायुभूतेन चरता विश्रमार्थं मुहुर्मुहुः"

**निमित** त्रि० नि+मि—क्त। समदीर्घविस्तारपरिमाणयुक्ते निघशब्दे दृश्यम्।

**निमित्त** न० नि+मिद्—क्त। "अनात्मनेपदनिमित्ते" पा सूत्रनिर्देशान्न न दस्य नः। १हेतौ २चिह्ने च अमरः "निमित्तेषु च सर्वेषु ह्यप्रमत्तो च भवेन्नरः" स्मृतिः "मयैव पूर्वं निहता धार्त्तराष्ट्राः निमित्तमात्रं भव सव्यसाचिन्!" गीता "अतः कालं प्रवक्ष्यामि निमित्तं कर्मणामिह" ति० त० भविष्यपु० "मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्वशः। उल्लेखनमकुर्वाणो न तस्य फलभाग् भवेत्" ति०त० भविष्यपु०। ब्रह्माण्डे "निमित्तानि च शंसन्ति शुभाशुभफलोदयम्" "निमित्तं मनश्चक्षुरादिप्रवृत्तौ" हस्तामलकम्। शुभाशुभसूचके ३शकुने "निमित्तानि च पश्यामि विपरीतानि केशव!" गीता ४फले उद्देश्ये "निमित्तात् कर्मयोगे" वार्त्ति० निमित्तमिह फलम्। ५निमित्तनिश्चये नैमित्तिकं निमित्तनिश्चयादागतम्। ६शरव्ये च शब्दार्थचि० स्वार्थे क तत्रार्थे संज्ञायां कन्। निमित्तक चुम्बने शब्दमाला।

**निमित्तकारण** न० कर्म०। नैयायिकमते समवायिकारणाऽसमवायिकारणभिन्नकारणे तथाहि घटादौ मृत्तिकादि समवायि कारणम् कपालद्वयसंयोगोऽसमवायिकारणम्। कुलालचक्रदण्डसलिलसूत्रादि निमित्तकारणम्। एवमदृष्टादि कालादि च। एवमन्यत्र यथायथमुन्नेयम्।

**निमित्तकृत्** त्रि० निमित्तं शकुनं रुतेन करोति कृ—क्विप् तुक्। रवेण दुष्टादुष्टशकुनकारके काके राजनि०। तस्य रवेण शकुनसूचकत्वात् तथात्वम्। काकरुतशब्दे १८४४ पृ० दृश्यम्।

**निमित्तबध** पु० निमित्तेन रोधादिहेतुना वधः। रोधादिनिमित्ते १गवादेर्बधे तत्र प्रायश्चित्तादि प्रा०त०उक्तं यथा "रोधादिनिमित्तकप्रायश्चित्तम्। तत्राङ्गिराः "रोधने बन्धने चापि योजने च गवां रुजः। उत्पाद्य मरणं वापि निमित्ती तत्र लिप्यते। पादञ्चरेद्रोधवधे द्वौ पादौ बन्धने चरेत्। योजने पादहीनं स्याच्चरेत् सर्वं निपातने"। निमित्ती लिप्यत इति यथाकथञ्चित् मरणनिमित्ततारतम्येन "यो भूय आरभते तस्मिन् फले विशेषः" इत्यापस्तम्बवचनात् पापविशेषेण लिप्यते तद्विशेषात् प्रायश्चित्तविशेषमाह पादञ्चरेदित्यादि। रोधः क्षीणायाः गोराहारप्रचारनिर्गमविरोधः। बन्धनमयथाबन्धनमकालबन्धनञ्च। योजनं हलशकटादौ